**Series : SOS/1**

**Code No. 49/1**
**कोड नं.**

**Roll No.**
**रोल नं.**

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

Candidates must write the Code on the title page of the answer-book.
परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।

- Please check that this question paper contains **12** printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains **12** questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minutes time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the student will read the question paper only and will not write any answer on the answer script during this period.
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ **12** हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में **12** प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जायेगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।

# संस्कृतम् (ऐच्छिकम्)

# SANSKRIT (Elective)

*अवधि : 3 होरात्रयम् ]* *[ पूर्णाङ्काः : 100*
*निर्धारित समय : 3 घण्टे ]* *[ अधिकतम अंक : 100*
*Time allowed : 3 hours ]* *[ Maximum marks : 100*

**निर्देशाः :**
**निर्देश :**
**Instructions :**

1. उत्तराणि उत्तरपुस्तिकायाम् एव लेखनीयानि ।
   उत्तर उत्तर-पुस्तिका में ही लिखें ।
   *Write answers in the answer-sheet only.*

2. संकेताभावे सर्वेषां प्रश्नानामुत्तराणि संस्कृतेनैव लेखनीयानि ।
   जहाँ संकेत न हो, वहाँ सभी प्रश्नों के उत्तर संस्कृत में ही लिखें ।
   *Answer all questions in Sanskrit unless instructions are given otherwise.*

अस्मिन् प्रश्नपत्रे **चत्वारः** खण्डाः सन्ति ।
इस प्रश्न-पत्र में **चार** खण्ड हैं ।
*There are **four** sections in this question paper.*

| | | | |
|---|---|---|---|
| खण्डः क | : | अपठितांश – अवबोधनम् (अपठितांश – अवबोधन) | **15 अङ्काः** |
| Section A | : | Unseen Reading Comprehension | |
| खण्डः ख | : | संस्कृतेन रचनात्मककार्यम् (संस्कृत में रचनात्मक कार्य) | **15 अङ्काः** |
| Section B | : | Writing Skills in Sanskrit | |
| खण्डः ग | : | पठितांश – अवबोधनम् संस्कृतसाहित्यस्य परिचयः च (पठितांश – अवबोधन एवं संस्कृत साहित्य-परिचय) | **40 + 10 = 50 अङ्काः** |
| Section C | : | Reading Comprehension & Introduction to History of Sanskrit Literature | |
| खण्डः घ | : | छन्दोऽलङ्काराः (छन्द एवम् अलङ्कार) | **20 अङ्काः** |
| Section D | : | Metres and Figures of Speech | |

## खण्डः क (Section A) 15 अङ्काः

### अपठितांश – अवबोधनम्

### अपठितांश – अवबोधन

### Unseen Reading Comprehension

1. अधोलिखितम् अनुच्छेद**द्वयं** पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत :
अधोलिखित **दोनों** अनुच्छेदों को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए :
Read the following **two** passages and answer the given questions in Sanskrit :

**(क) प्रथमः अनुच्छेदः**

प्राणिनां जन्मनः प्रक्रिया एतादृशी गभीरा अस्ति या केवलं तमसि एव जायते । मानवानाम् चेतसि येषां भावानां जन्म भवति तदपि अन्धकारे एव भवति । किं बहुना कवेः कविताऽपि अचेतनमनसि एव प्रस्फुरति । चित्रकारस्य चित्रमपि मनसः तासु गभीरासु स्थितिषु जायते यत्र प्रकाशस्य स्फुरणं न भवति । एवं यदपि तथ्यं प्रकृतौ दृश्यते तत्सर्वं तमिस्रायां प्रकृतिं प्राप्य प्रकाशे विकृतिमधिगच्छति । कदाचित् भगवान् श्रीकृष्णोऽपि अन्धकाराच्छन्नायां रात्रौ अत एव जन्म लेभे यत् स सत्यस्य प्रतिमानमस्ति ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत । $\frac{1}{2} \times 2 = 1$

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) भावानां जन्म कदा भवति ?

(ii) सत्यस्य प्रतिमानं कः ?

(ब) पूर्णवाक्येन उत्तरत । $1 \times 2 = 2$

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

श्रीकृष्णः कस्मात् कारणात् रात्रौ जन्म लेभे ?

(स) यथानिर्देशम् उत्तरत । $\frac{1}{2} \times 4 = 2$

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'स्थितिषु' अस्य पदस्य विशेषणं किम् ?

(ii) 'प्रस्फुरति' अस्याः क्रियायाः कर्तृपदं किम् ?

(iii) 'सरला' अस्य विलोमपदं किम् ?

(iv) 'विकारम्' अस्य कः पर्यायः अत्र प्रयुक्तः ?

**(ख) द्वितीयः अनुच्छेदः**

मनसि प्राप्तानां विचाराणां परान् प्रति प्रेषणस्य साधनं शब्दाः एव । न वयं सदैव तान् तान् भावान् शब्दरूपेण प्रकटयामः ये चेतसि प्रतिक्षणं समागच्छन्ति । अस्माकं मतिरेव तत्सर्वं निर्धारयति यद्वयं मुखेन वदामः । प्रमत्तजनस्य अप्रमत्तस्य च मध्ये इदमेव अन्तरं भवति यद् अप्रमत्तः कथयति पूर्वं विचार्य, प्रमत्तश्च अविचार्य सर्वान् भावान् निवेदयति । बुद्धिर्हि भवति तस्य निष्क्रिया । वाणी हि जनं लघुं गुरुं च करोति । यो हि जनः बुद्धिमान् सन्नपि वक्तुं कलायामनभिज्ञः, स्वविचारप्रेषणे चासमर्थः स आधुनिके युगे सर्वत्र अग्रेसरीभवितुम् अक्षम एव भवति । वाणी तु परेभ्यः एव भवति । यदि जनाः मनोभावान् अस्माकं न बोधन्ति तर्हि वयं नैव बोधामः वक्तृशक्तिम् । प्रत्येकं भाषायाः प्रकृतिरपि भिन्ना एव । आंग्लभाषा तु शीघ्रतया उच्यते परं हिन्दीभाषा तु शनैः शनैः । यदि कोऽपि अनयोः स्वरूपं परिवर्तयति तु स भाषायाः मौलिकसिद्धान्तेभ्यः एव भ्रश्यति । अत एव च परेषु तस्याः भाषायाः प्रभावो न जायते ।

प्रश्नाः

(अ) एकपदेन उत्तरत । $1 \times 2 = 2$

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) वयं कां न बोधामः ?

(ii) भाषा केभ्यः भ्रश्यति ?

(ब) पूर्णवाक्येन उत्तरत । $2 \times 2 = 4$

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

(i) शब्दाः कस्य साधनं सन्ति ?

(ii) मुखेन उच्चारणे का सर्वं निर्धारयति ।

(स) यथानिर्देशम् उत्तरत । $1 \times 2 = 2$

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'बुद्धिर्हि भवति तस्य निष्क्रिया' अत्र 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(ii) 'सक्रिया' अस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं **संस्कृतेन** लिखत । 2

इस अनुच्छेद के लिए उपयुक्त शीर्षक **संस्कृत** में लिखिए ।

Write a suitable title for this passage in **Sanskrit**.

## खण्डः ख (Section B) 15 अङ्काः

### संस्कृतेन रचनात्मककार्यम्

### संस्कृत में रचनात्मक कार्य

### Writing Skills in Sanskrit

2. मञ्जूषातः उचितसङ्केतान् गृहीत्वा अधोलिखितां कथां पूरयित्वा लिखत : 1 × 10 = 10

मञ्जूषा से उचित संकेत लेकर अधोलिखित कथा को पूरा कर लिखिए :

Complete and rewrite the following story, taking help from the words given in the box below :

**कथा**

एकः अतिलुब्धः स्वार्थी च वैद्यः आसीत् । तस्य स्वभावहेतोः रोगिणः तस्मात् चिकित्सां नाकारयन् ______ (i) वैद्य एकस्य वृक्षस्य अधः अतिष्ठत् । स तत्कोटरे ______ (ii) एकं सर्पम् अपश्यत् । स अचिन्तयत् यदि सर्पोऽयं कमपि ______ (iii) तर्हि स चिकित्सार्थं मत्पार्श्वे ______ (iv) । अहं महान्तं धनराशिं लभेय । विचार्य एवं समीपे क्रीडन्तम् एकं शिशुमकथयत् ______ (v) वृक्षकोटरे सारिका तिष्ठति, त्वं तामानय पंजरबद्धां च कुरु । शिशुः सस्नेहम् तां प्राप्तुमैच्छत् । वैद्यः संकेतेन शिशुं कोटरे ______ (vi) । शिशुः यावत् पश्यति तावत् तस्य हस्ते सर्पः आगतः । भीतः स सत्वरम् ______ (vii) तम् । सर्पस्तु वैद्यस्य कन्धरया संलग्नः । वैद्यस्य बहुभिः प्रयासैरपि सर्पः ततः न अगच्छत् ______ (viii) चादशत् । शिशुः तु ______ (ix) आकारयत् । ग्रामीणाः तस्य उपचारं कृतवन्तः । ______ (x) वैद्यः स्वकर्मसु पौनःपुन्येन खिन्नः शिशुं ग्रामीणान् च क्षमामयाचत् ।

**मञ्जूषा**

| |
|---|
| अक्षिपत्, शयानम्, निराशः, वत्स !, दशेत्, प्रैषयत्, वैद्यम्, संज्ञितः, समागमिष्यति, ग्रामीणान् । |

3. मञ्जूषातः शब्दान् संचित्य नदीतटस्य वर्णनं संस्कृतेन **पञ्चसु** वाक्येषु कुरुत । 1 × 5 = 5

मञ्जूषा से शब्दों को चुनकर नदीतट का वर्णन संस्कृत के **पाँच** वाक्यों में कीजिए ।

Write **five** sentences in Sanskrit describing the bank of a river, taking help from the words given in the box below.

**मञ्जूषा**

| |
|---|
| प्रातः, जनाः, यात्रिणः, हवनम्, स्नान्ति, अर्चनाम्, तरन्ति, शिशवः, नावः, वृक्षेषु, खगाः, सूर्यनमस्कारम् । |

## खण्डः ग (Section C) 40 + 10 = 50 अङ्काः

### पठितांश – अवबोधनम् संस्कृतसाहित्यस्य परिचयः च

### पठितांश – अवबोधन एवं संस्कृत साहित्य-परिचय

### Reading Comprehension & Introduction to History of Sanskrit Literature

4. अधोलिखितं गद्यांशं, पद्यांशं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत :

निम्नलिखित गद्यांश, पद्यांश तथा नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए :

Read the following prose, poetry and drama passages and answer the given questions in Sanskrit :

**(क) गद्यांशः**

अहं देशसेवां कर्तुं गृहाद् बहिरभवम् । मया निश्चितमासीत् "एतावन्ति दिनानि स्वोदरसेवायै क्लिष्टोऽभवम् । इदानीं कियन्तं कालं देशसेवायामपि लक्ष्यं ददामि । यथैवाहं मार्गेऽग्रेसरीभवामि, तथैव मम बाल्याध्यापकमहोदयः सम्मुखोऽभवत् । मास्टरमहोदयेन प्रस्थानहेतौ पृष्टे सति सम्पूर्णसमाचार - निवेदनं ममाऽऽवश्यकमभूत् ।" अध्यापकमहोदयः प्रावोचत् – "तात, सर्वमिदं सम्यक् । किन्तु स्वगृहाभिमुखमपि किञ्चिद् विलोकनीयं भवेत् । येषां भरणपोषणं भवत्येवायत्तम्, तान् किं भवान् निराधारमेव निर्मुच्य स्वैरं गन्तुमर्हेत् ।"

**प्रश्नाः**

(अ) एकपदेन उत्तरत । $\frac{1}{2} \times 2 = 1$

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) कः गृहाद् बहिः अभवत् ?

(ii) कुत्र लक्ष्यं दातुमिच्छति लेखकः ?

(ब) पूर्णवाक्येन उत्तरत । $1 \times 2 = 2$

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

(i) लेखकेन किं निश्चितम् ?

(ii) अध्यापकमहोदयः किं प्रावोचत् ?

(स) यथानिर्देशम् उत्तरत । $\frac{1}{2} \times 4 = 2$

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'अर्हेत्' अस्याः क्रियायाः कर्तृपदं किम् ?

(ii) 'विमुखः' अस्य विलोमपदं किम् ?

(iii) 'अधीनम्' अस्य कः पर्यायः ?

(iv) 'दिनानि' अस्य किं विशेषणम् ?

**(ख) पद्यांशः**

"स्वायत्तमेकान्तगुणं विधात्रा, विनिर्मितं छादनमज्ञतायाः ।

विशेषतः सर्वविदां समाजे विभूषणं मौनमपण्डितानाम् ।। "

**प्रश्नाः**

(अ) एकपदेन उत्तरत । $\frac{1}{2} \times 2 = 1$

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) विधात्रा कस्याः छादनं विनिर्मितम् ?

(ii) अपण्डितानां भूषणं किम् ?

(ब) पूर्णवाक्येन उत्तरत । $2 \times 1 = 2$

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

विदुषां समाजे मूर्खाणां किं भूषणम् ?

(स) यथानिर्देशमुत्तरत । $1 \times 2 = 2$

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) मूर्खतायाः कः पर्यायः ?

(ii) 'अज्ञानाम्' अस्य किं विलोमपदम् ?

**(ग) नाट्यांशः**

लवः : (प्रविश्य स्वगतम्) अविज्ञातवयःक्रमौचित्यात् पूज्यानपि सतः कथमभिवादयिष्ये ? (विचिन्त्य)

अयं पुनरविरुद्धप्रकार इति वृद्धेभ्यः श्रूयते । (सविनयमुपसृत्य) एष वो लवस्य शिरसा प्रणामपर्यायः ।

अरुन्धती-जनकौ : कल्याणिन् आयुष्मान् भूयाः ।

अरुन्धती : एहि वत्स ! (लवमुत्सङ्गे गृहीत्वा आत्मगतम्) दिष्ट्या न केवलमुत्सङ्गश्चिरान्मनोरथोऽपि मे पूरितः ।

प्रश्नाः

(अ) एकपदेन उत्तरत । $\frac{1}{2} \times 2 = 1$

एक शब्द में उत्तर दीजिए ।

Answer in one word.

(i) लवः कथमुपसर्पति ?

(ii) अरुन्धती लवं कुत्र गृह्णाति ?

(ब) पूर्णवाक्येन उत्तरत । $2 \times 1 = 2$

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence.

लवानुसारम् अभिवादनप्रकारः कः ?

(स) यथानिर्देशम् उत्तरत । $1 \times 2 = 2$

यथानिर्देश उत्तर दीजिए ।

Answer as directed.

(i) 'क्रोडे' अस्य कः पर्यायः ?

(ii) 'अचिरात्' अस्य विलोमपदं किम् ?

5. शब्दान् अर्थैः सह मेलयत । $\frac{1}{2} \times 4 = 2$

शब्दों का अर्थों से मिलान कीजिए ।

Match the words with their meanings :

| शब्दाः | अर्थाः |
|---|---|
| (अ) उपार्जितानाम् | (i) कुर्वन् |
| (ब) समाचरन् | (ii) चक्रवर्त्तिनाम् |
| (स) विश्वविजयिनाम् | (iii) गर्वितान् |
| (द) दृप्ताम् | (iv) सञ्चितानाम् । |

6. रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत । $1 \times 4 = 4$

रेखाङ्कित पदों के आधार पर प्रश्न निर्माण कीजिए ।

Frame questions on the basis of underlined words.

(i) अन्धेन <u>तमसा</u>वृताः ।

(ii) शरद्<u>घनं</u> नार्चति चातकोऽपि ।

(iii) भवन्ति भाजनान्यु<u>पदेशानाम्</u> ।

(iv) इमामे<u>वाशां</u> पोषयति ।

7. अधोलिखितभावार्थयो: रिक्तस्थानपूर्तिं मञ्जूषापदसहायतया कुरुत : **3 + 3 = 6**

निम्नलिखित **दोनों** भावार्थों में मञ्जूषा में दिए गए शब्दों की सहायता से रिक्तस्थानपूर्ति कीजिए :

Fill in the blanks in the following **two** explanations with the help of the words given in the box below :

(अ) 'विद्यां चाविद्यां च यस्तद्वेदोभयं सह ।
अविद्यया मृत्युं तीर्त्वा विद्ययाऽमृतमश्नुते ।।'

**भावार्थ:**

यः नरः ______ (i) सृष्टिविज्ञानादिकं च ______ (ii) जानाति स एव ______ (iii) आयुर्विज्ञानादिना ______ (iv) दूरीकरोति अध्यात्मज्ञानेन ______ (v) अमरताम् ______ (vi) ।

(ब) 'ददाति प्रतिगृह्णाति गुह्यमाख्याति पृच्छति ।
भुङ्क्ते भोजयते चैव षड्विधं प्रीतिलक्षणम् ।।'

**भावार्थ:**

समुद्ररूपी ______ (i) राजानं विक्रमादित्यं ______ (ii) षट् रूपाणि ______ (iii) कथयति यः नरः . ददाति कस्मैचित् ______ (iv) च नयति, स्वरहस्यं कथयति परस्य ______ (v) पृच्छति, स्वयं तु खादति परं परानपि खादयति स एव प्रीतेः ______ (vi) स्वरूपाणि जानाति ।

**मञ्जूषा**

| |
|---|
| रहस्यम्, अध्यात्मज्ञानम्, उभयम्, नरः, मृत्युम्, ब्राह्मणः, षट्, वर्णयन्, प्रीतेः, च, कस्माच्चित्, अश्नुते । |

8. अधोलिखितयोः **श्लोकयोः** अन्वययोः रिक्तस्थानपूर्तिं कुरुत : $1\frac{1}{2} + 1\frac{1}{2} = 3$

निम्नलिखित **दोनों** श्लोकों के अन्वयों में रिक्तस्थान भरिए :

Fill in the blanks in the following prose-order renderings of the **two** verses :

(अ) 'यदि नो सन्ति सन्त्येव केयमद्य विभीषिका ।
किमुक्तैरेभिरधुना तां पताकां हरामि वः ।। '

**अन्वयः**

यदि नो सन्ति ______ (i) एव । अद्य 'इयम्' का ______ (ii) अधुना एभिः ______ (iii) किम् ? वः तां पताकाम् हरामि ।

(ब) 'अस्ति यद्यपि सर्वत्र नीरं नीरजराजितम् ।
रमते न मरालस्य मानसं मानसं विना ।। '

**अन्वयः**

यद्यपि ______ (i) नीरजराजितम् नीरम् अस्ति । (तथापि) ______ (ii) मानसं ______ (iii) विना न रमते ।

9. यथानिर्देशम् उत्तरत ।

यथानिर्देश उत्तर दीजिए ।

Answer as directed. $\frac{1}{2} \times 4 = 2$

(अ) कर्तृपदं क्रियापदं च चिनुत ।

कर्ता एवं क्रियापद चुनिए ।

Select the subject and the verb.

(i) 'अहं पुन: दीर्घावकाशं स्वीकरिष्यामि ।'

(ii) 'अहम् एतस्य आक्रमणात् सुरक्षितो भवेयम् ।'

(ब) विशेषणपदं चिनुत । $1 + 1 = 2$

विशेषण पद चुनिए ।

Select the adjective.

(i) 'महता वीरदर्पेण प्रचलित: अहम् ।'

(ii) 'प्रवाह: पूर्णमात्रेण प्रवर्द्धमान आसीत् ।'

(स) अधोलिखितपंक्तिषु रेखाङ्कितसर्वनामपदानि केभ्य: प्रयुक्तानि ? $1 \times 2 = 2$

अधोलिखित पंक्तियों में रेखाङ्कित सर्वनाम पद किनके लिए प्रयुक्त हुए हैं ?

In the following lines for whom the underlined pronouns are used ?

(i) शिववीरस्य विश्वासपात्रं तस्यैव पत्रमादाय प्रयाति ।

(ii) अनया दैववशेन परिगृहीता विक्लवा भवन्ति राजान: ।

(द) अधोलिखितपंक्तिभ्यां 'नीचै:' तथा 'पर्वत' इति पदयो: समानार्थकपदे चित्वा लिखत : $1 + 1 = 2$

निम्नलिखित पंक्तियों में से 'नीचै:' तथा 'पर्वत' पदों के समानार्थक पद चुनकर लिखिए :

Select and write the synonyms of 'नीचै:' and 'पर्वत' from the following lines :

(i) 'सप्त कुलाचलान् वदन्ति ।'

(ii) 'समुद्रेभ्योऽधोभागे तिष्ठन्ति ।'

(य) क: कं वदति ? $\frac{1}{2} \times 4 = 2$

कौन किससे कह रहा है ?

Who is saying this to whom ?

(i) "यद्रत्नं चतुरङ्गबलं ददाति तद्ग्रहीष्याम: ।"

(ii) "भो समुद्र ! विक्रमार्को राजा यज्ञं करोति ।"

10. (अ) अधोलिखितलेखकानाम् **कस्यापि** काव्यस्य नाम लिखत : 1 × 5 = 5

निम्नलिखित लेखकों के किसी **एक** काव्य का नाम लिखिए :

Write the names of any **one** work each of the following poets :

भारविः, व्यासः, भर्तृहरिः, चन्द्रशेखरदासः, दाराशिकोहः ।

(ब) अधोदत्तानां रचनानां लेखकानाम् नाम लिखत : 1 × 5 = 5

निम्नलिखित रचनाओं के लेखकों के नाम लिखिए :

Write the names of the authors of the following works :

पाषाणीकन्या, समुद्रसङ्गमः, प्रबन्धमञ्जरी, नीतिशतकम्, उत्तररामचरितम् ।

## खण्डः घ (Section D) 20 अङ्काः

### छन्दोऽलङ्काराः

### छन्द एवम् अलङ्कार

### Metres and Figures of Speech

11. (अ) प्रश्नान् उत्तरत । 1 × 4 = 4

प्रश्नों के उत्तर दीजिए ।

Answer the questions.

(i) 'यगणे' क्रमशः काः मात्राः ?

(ii) 'मालिका' इति पदे को गणः ?

(iii) 'तटस्थम्' अत्र 'थ' वर्णो लघुः गुरुः वा ?

(iv) वसन्ततिलकायां प्रतिचरणं कति वर्णाः ?

(ब) अधोलिखितपरिभाषाः पूरयत : 1 × 3 = 3

निम्नलिखित परिभाषाएँ पूर्ण कीजिए :

Complete the following definitions :

(i) 'ननमय .......... भोगिलोकैः ।'

(ii) 'श्लोके षष्ठं ............ सर्वत्र लघुपंचमम् ।'
............................ सप्तमं दीर्घमन्ययोः ।।'

(iii) 'सूर्याश्वैर्यदि .................. शार्दूलविक्रीडितम् ।'

(स) अधोलिखितपङ्क्त्यां किं छन्दः ? $1 \times 1 = 1$

निम्नलिखित पंक्ति में कौन सा छन्द है ?

Name the metre in the following line :

'सन्मित्रलक्षणमिदं प्रवदन्ति सन्तः ।'

(द) अधोलिखितयोः कस्यचिद**एकस्य** छन्दसः उदाहरणं लिखत : $1 \times 2 = 2$

निम्नलिखित में से किसी **एक** छन्द का उदाहरण लिखिए :

Write an example of any **one** of the following metres :

वंशस्थम्, उपजातिः ।

12. (अ) अधोलिखितानाम् अलङ्काराणां परिभाषाः पूरयत : $1 \times 4 = 4$

निम्नलिखित अलङ्कारों की परिभाषाएँ पूर्ण कीजिए :

Complete the following definitions of the following figures of speech :

(i) 'साम्यं वाच्यमवैधर्म्यं ................................ ।'

(ii) 'भवेत्सम्भावनोत्प्रेक्षा ................................. ।'

(iii) 'श्लिष्टैः पदैरनेकार्था .......................................... ।'

(iv) 'भवेदर्थान्तरन्यासः .............................. ।'

(ब) अधोलिखितयोः कस्यचिद**एकस्य** अलंकारस्य उदाहरणं लिखत : $1 \times 3 = 3$

निम्नलिखित में किसी **एक** अलंकार का उदाहरण लिखिए :

Write an example of any **one** of the following figures of speech :

अनुप्रासः, यमकम् ।

(स) अधोलिखितपंक्तिषु **के** अलङ्काराः ? $1 \times 3 = 3$

निम्नलिखित पंक्तियों में **कौन** से अलङ्कार हैं ?

What are the figures of speech in the following lines ?

(i) 'कुवलयदलस्निग्धश्यामः ।'

(ii) 'कचकलापैः कमनीयकपोलपालिः ।'

(iii) 'वाग्भूषणं भूषणम् ।'

---